# 2018

# M.A.

## Semester –II

## SANSKRIT

### PAPER–204

### Subject Code—12

*Full Marks* : 40

*Time* : 2 Hours

*The figures in the right-hand margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

*Illustrate the answer wherever necessary.*

अधोलिखितेषु प्रश्नेषु केषाञ्चिद् विंशतिप्रश्नानां लघूनि उत्तराणि प्रदेयानि । 20×2

१. वेदाशब्दस्य कोऽर्थः ?

२. वेदस्य 'त्रयी'–नामधेयत्वे कारणं किम् ?

३. केन-कठ-प्रश्ना: इत्येता: उपनिषद: कस्मिन् वेदेऽन्तर्भूता: ?

४. शुक्लयजुर्वेदस्य साम्प्रतं शाखाद्वयं किम् ?

५. ऐतरेय-शतपथ-गोपभनि इत्येतानि ब्राह्मणानि केषु वेदेषु अन्तर्भूतानि ?

६. वालगङ्गाधरतिलकमते तथा विन्तरनित्समते वेदस्य काल: क: ?

७. रामायणस्य मुख्य: रस: क: ? तस्य मुख्यत्वे किं कारणं स्वीकृतमालंकारिकै: ?

८. शुन:शेपाख्यानं कुत्र वर्तते ?

९. रामायणमवलम्ब्य रचितं नाटकचतुष्टयं नामग्राहमुल्लिख्यताम् ।

१०. महाभारतस्य कस्मिन् पर्वणि श्रीमद्भगवद्गीता वर्तते ? अस्या: श्लोकसंख्या कति ?

११. महाभारतस्य नामान्तराणि कानि? श्लोकसंख्योल्लेखपुर:सरं लिख्यन्ताम् ।

१२. कति उपपुराणानि ? तेषु पञ्चानां नामानि उल्लिख्यन्ताम् ।

१३. मेघदूतस्य कति विभागा: के च ते ? काव्यमेतत् केन छन्दसा रचितम् ?

१४. 'कुमारसम्भवम्'–इत्यस्य रचयिता क: ? तत्र कुमारशब्देन क: परामृश्यते ?

१५. अश्वघोषस्य कृतीनां परिचयो दीयताम् ।

१६. माघरचितं महाकाव्यं किम् ? तत्र कति सर्गा: सन्ति ?

१७. आयुर्वेदीयशास्त्राणां नामानि लिख्यन्ताम् ?

१८. 'अष्टाध्यायी' इति कस्य कृति: ? अत्र कति अध्याया: कति पादाश्च सन्ति?

१९. पाणिनिपूर्ववर्तिन: वैयाकरणत्रयस्य नाम लिख्यताम् ।

२०. भारोपीयभाषाया: पूर्वनामानि लिख्यन्ताम् ।

२१. भारोपीयभाषापरिवारस्य आदिवासस्थानं कुत्र आसीत् ?

२२. भारोपीयभाषायां के स्पृष्टा: नासन् ? तत्र भाषायाम् अर्धव्यञ्जनस्वरध्वनय: के आसन् ?

२३. मातृकाविद्या का?

२४. पुष्पिका का ?

२५. गिल्‌गिट्‌मातृका केन कुत्र लब्धा ? अधुना सा कुत्र संरक्षिता अस्ति ।

—o—

(Turn Over)